॥ अथ श्रीमद्भागवतटिप्पणी विजयध्वजगूढार्थविचारिणी प्रारभ्यते ॥



॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ ॥ वंदे श्रीवामनाख्यं तमष्टमस्कंधदैवतं ॥ कर्तुमादित्यकार्यं यः क्रूरदैत्यानहन्युधि ॥ १ ॥ ॥ मनुना कर्त्रा । श्रुतिमस्तकेनेशावास्योपनिषदाख्योत्तमांगेन करणेन । एवमग्रेऽन्वयद्वयेऽपि कर्तृकरणयोस्तृतीया ज्ञेया । आत्मा स्वतंत्रः परमात्मा । अनुविद्धो लक्षीकृतो येन स तथा तादृश आत्मा मनो येषां ते तथा तैः । धृताभूः पूर्णता येन स तथा ॥ १ ॥ स्त्रिया स्त्रीरूपेण येन । जगत्त्रयबंधि चेति श्लोकपाठः । दैत्यं हयग्रीवासुरं ॥ २–३ ॥ अत्राप्यष्टमस्कंधेऽपि । मूले त्रिभिरर्धैर्चैः श्लोकः पूर्यते इति भावेनान्यान्स्वायंभुवातिरिक्तानिति टीकायामुक्तं । ततश्चायं मूलार्थः । वर्णाश्चाश्रमाश्च वर्णाश्रमाः । चत्वारश्च चत्वारश्च चत्वारः । ते च ते वर्णाश्रमाश्च तथा । चतुर्वर्णाश्रमा आश्रिता यान् धर्मास्ते तथा । चतुर्वर्णाश्रिता एव चातुर्वर्णाश्रितास्तादृशधर्मा यत्र मनुवंशे श्रुताः । विश्वसृजां रुचिकर्दमदक्षाणां सकाशात्सर्गो यत्र मनुवंशे श्रुतः । सोऽयं मनोर्वंशः श्रुत इत्यन्वयः ॥ १ ॥ तत्प्रसंगे अन्यमनुप्रसंगे ॥ २ ॥ मूले भगवान् यस्मिन् कुरुतेऽतीते यत्कृतवान् । अथानागते यत्कर्ता वा तद्वदेति योज्यं ॥ ३ ॥ व्यतीतास्स्विति मूलपाठः । तुः स्याद्भेदेऽवधारण इत्यभिधानात् विशेषत्वापरपर्यायबाहुल्यार्थकस्तु शब्द इति भावेन व्यतीतास्स्वित्यस्य व्यतीतप्राया इत्युक्तं ॥ ४ ॥ शतरूपापतिर्मनुस्तस्य तस्य पालनादि विषयकं अनुदितं अनुक्तं यद्यज्ञमूर्तिचरितं तद्वक्तुमाह ॥ अकूत्यामित्यादिनेति टीकापाठः । अनेनास्मिन् श्लोकेऽवतरणप्रसक्तमनुपालनस्यानुक्तत्वादवतरणश्लोकयोरसंगतेति चोद्यं परास्तं । मूले धारकत्वाद्धर्मो हरिः । तद्विषयकं यत्ज्ञानं तदुपदेशार्थं । वै शब्दः कपिलयज्ञयोर्ज्ञानकार्यावतारत्वेऽपि बलकार्यमप्यस्तीति प्रसिद्धिद्योतकः । अग्रे यातुधानसगरात्मजहननोक्तेः ॥ ५–६ ॥ मूले काम्यंत इति कामा विषयास्तेषां भोगेषु । वैराग्यानंतरं सभार्यः सभक्तिकः । तदनंतरं तपसे ज्ञानार्थं । तप् आलोचन इति धातुः । वनं वननीयं यज्ञं तन्नामानं हरिं शरणमाविशदित्यन्वयः ॥ ७ ॥ स्तुतिरूपां स्तुतिस्वरूपां उपनिषदं पुंजीभूतोपनिषदं । त्रयी श्रुतिर्नित्यवाक्च वेदोऽनुवचनं तथेत्यभिधानात् अप्यक्षरसाम्यादिति न्यायेनानुवचन पदस्यार्थ इत्याशयेन टीकायां अनुस्तुतिरूपामुपनिषदित्युक्तं । पुंजीभूतत्वंच । भयात्तपति सूर्य इति काठकश्रुत्यादि ॥ ८ ॥ तां पुंजीभूतोपनिषदं उपलक्षयति ज्ञापयति । नो न वेदेति वेद चेति तलवकारश्रुत्यर्थस्तु श्रुतिपूर्वशेषेण ज्ञेयः । तत्पूर्वश्रुतिस्तु । यो नस्तद्वेद वेदेति । तथाहि । नोऽस्माकं यस्तु अहं ब्रह्म वेदेति वदति स तन्नो वेद । कुतः । परिच्छिन्नत्ववेदनात् । अहं न वेदेति असौ वेद च । कुतः । अपरिच्छिन्नत्ववेदनात् । आप्राद्यावेति श्रुत्यर्थस्तु इंद्रियादि प्रेरको देवः पृथिवीमंतरिक्षं च तत्रस्थान् सज्जनान् द्यावा ज्ञानेन तेजसा वा आप्राः समंतादपूरयदिति । जीवः पिप्पलं कर्मफलं स्वाद्वत्ति । अन्यः परमात्मा

अनश्नन् अभिचाकशीति जीवाभिमुखं प्रकाशत इति । आथर्वणश्रुत्यर्थः ॥ ९ ॥ इदानीमर्थत ईशावास्योपनिषदमेवाह भगवान्वेदेशः ॥ आत्मेति । कार्यात्मना उत्पन्नं कारणात्मना अनुत्पन्नं स्वव्यतिरिक्तं परमात्मव्यतिरिक्तं । कैमुत्यन्यायेनेत्यस्यायं भावः । विश्वस्य प्रकृत्यात्मकत्वाद्विश्वं तदाविनाभूतमिति ॥ १० ॥ अस्य परमात्मनः येन तत्सद्भावेन इदं जगत् । चक्षुष्टु च तस्यैव हरेरेव । अदृश्येऽनात्म्य इति तैत्तरीयश्रुत्यर्थस्तु । जीवानामदृश्ये । अनात्म्ये गुणानामसंगते । गुणानामानंत्यादनिरुक्ते । अभयत्वतोऽनिलयने हरौ जीवो ज्ञानेन यदा तिष्ठति तदा प्रतिष्ठां गतिरूपमभयं हरिं विंदत इति । यच्चक्षुर्नेति तलवकारश्रुत्यर्थस्तु । चक्षुषा तदभिमानिदेवेन यद्ब्रह्म न पश्यति न दृश्यते । चक्षूंषि चक्षुरभिमानिनो देवा ये । न ब्रह्मणा पश्यंति दृश्यंत इति ॥ ११–१२ ॥ तदेव मुक्तप्राप्यत्वमेव । अनेन परंज्योति पदेनोच्यते ॥ १३ ॥ कुर्वन्नेवेह कर्माणिति ईशावास्यश्रुत्यर्थस्तु । शतं समाः शतवर्षेषु इह मनुष्यजन्मानि यो जीवितुमिच्छेत्स तावत्कर्माणि स्वोचितानि कुर्वन्नेव आमरणं भगवत्पूजात्मकानि कर्माणि कुर्यादेवेति भावः । कर्तुमैतुरितिवत् हन् धातोस्तु स्याच्चेत् हंतुरिति रूपं सिध्यतीति भावेन हंतवे परिहारायेत्युक्तं । प्राय इत्यत्र अय् गताविति धातोर्ज्ञानामित्युक्तं ॥ १४–१५ ॥ आत्मवित् परमात्मवित् । अनेन पुरुषो जीवः फलानिच्छुत्वेन कर्मकर्ता चेतनत्वे सति निरहंकृतत्वादात्मवदित्यनुमानं सूच्यते ॥ १६ ॥ उपनिषदो वेदांगत्वात् मंत्रवर्णेन युक्तोपनिषदमित्युक्तं टीकायां ॥ १७–२१ ॥ तस्य विभोः ॥ २२ ॥ होत्रस्तन्नामा आद्यो येषां ते होत्राद्याः । पवनः सृंजयः यज्ञश्चेति त्रयस्तत्सुता मनुसुता इति मूलं योज्यं । यज्ञहोत्राद्या इत्येकपदांगीकारे पवनः सृंजय इति पदद्वयस्यान्वयाऽनुपपत्तिः ॥ २३–२६ ॥ इति त्रय आद्या येषां ते इत्याद्याः ॥ २७–२८ ॥ मूले विशिष्टा श्रेष्ठा धृतिर्वेदधारणा येषां ते विधृतयो विधृतय एव वैधृतयः । आदितेया इतिवत् वैधृतया इत्यपत्यार्थे भाव्यमिति चोद्यानवकाश इति हृदयं । इमे देवा मन्वंतरप्रवर्तकदेवतातिरिक्ताः ॥ २९ ॥ मूले यथा वा स्वायंभुवमन्वंतरे यज्ञ इंद्रः स एव हर्यवतारश्च तथा तापसांतरेऽपि तापसो मनुः स एव हर्यवतारश्चेत्यभिप्रायेण हरिरित्याहुतो येन गजेंद्रो मोचितो ग्रहादित्येव मूलपाठः । तत्रापि जज्ञे भगवानित्याद्यधिक पाठ इति वदंति केचित् । ततश्चेयं मूलयोजना । येन गजेंद्रेण पूर्वोक्तस्तापसो मनुर्हरिरित्याहुतः स गजेंद्रस्तापसेन ग्रहान्मोचित इति ॥ यद्वा ॥ बहुकल्पानुसारेण प्रमेयं सत्कथोदितमिति प्रमाणात्कल्पभेदेन तापसांतरे हरिण्यां हर्यवतारस्य संभवात् । तत्रापि जज्ञे भगवानिति पाठोऽप्यभ्यर्हितः । तदुक्तं विष्णुरहस्येऽष्टाविंशाध्याये । भगवानुवाच । चतुर्थस्तापसो नाम ह्युत्तमस्यानुजो मनुः । स्वयमेवहि यो विष्णुर्लीलया मनुतां गतः । तस्य मे तनया जाता वृषख्यात्यादयो दश । नासत्यो विशिखो नाम्ना प्राप्त ऐंद्रपदं सुराः । हरिवीरादयस्तत्र विधृतेस्तनयास्तु ये । त एव विधृता नाम धृता

वेदास्तु यैस्तदा । हरिमेधाः ऋषिर्नाम तस्यासीद्धरणी सती । तस्यां जातो हरिः साक्षादहमेव सुरेश्वर इति । आहुत इति दीर्घाभावः छांदस इति भावेन टीकायामाहूत इत्युक्तं ॥ ३०—३१ ॥ मूले भगवान्यत्र यत्र कथासु गीयते तत्कथासु तासु कथासु महत्पुण्यमस्तीत्यन्वयः। पुण्यस्य विशेषणं धन्यमित्यादि ॥ ३२ ॥ मूले प्रायोपविष्टं मरणार्थमुपविष्टं अनशनव्रतस्थं वा । प्रायश्चानशने मृत्यौ तुल्यबाहुलयोरपीत्यभिधानं ॥ ३३ ॥ मूले विं परमात्मानं प्रीणंतीति विप्राः । उ प्रत्ययः । विःपक्षि परमात्मनोरित्यभिधानं ॥ ३४ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां प्रथमोऽध्यायः ॥ ८--१ ॥

॥ हरिः ॐ ॥ ॥ आसीत् आस्ति ॥१॥ त्रिकूट इति नाम निर्वक्ति ॥ त्रिभि श्रृंगैरितिः। कुटोऽस्त्री शिखरं श्रृंगमित्यमरः। अन्येषु कूटेषु सत्स्वपि त्रयाणामेव मुख्यत्वमिति भावः ॥ २ ॥ नानाद्रुमलतागुल्मैर्वृतः अंभसां निर्घोषैश्च वृतः ॥३--४॥ अप्सरोभिः सहक्रीडाद्भिः ॥ ५ ॥ अमर्षयाऽसहनेनेति टीकापाठः । सिंह्यानां द्वीपांतस्थत्वेन मनुष्यदृष्टयगोचरत्वात् टीकायां बुद्धया श्लाघिन इत्युक्तं ॥ ६--९ ॥ मंदारः हारिवाळमर । पारिजात पारिजातमर । पाटल बोकणमर । अशोक केंपु मुत्तलमर । चंपक संपिगेमर ॥ १० ॥ कामोद्रेकहेतुत्वाच्चूते अंगनाप्रिय इत्युक्तं । प्रियालः स्फोट नाम वृक्ष इति टीकापाठः । आम्रः पिकोदरो माकंद नामा स चूत इति टीकापाठः । चूत माविनमर । प्रियाल हारिवालमर । पनस हलसिनमर। आम्र हुणसेमर । आम्रातक अमसोलमर। क्रमुक अडिकेमर। नारिकेल तेंगिनमर । खर्जूर उत्तत्तिमर । बीजपूरक दाडिंबमर ॥ ११ ॥ मधुक इप्पीमर । साल श्रीतालमर । ताल ताडिनमर । तमाल करतामलमर । असन अगसीमर । अर्जुन मत्तीमर । अरिष्टा अंटालमर । औदुंबर अत्तीमर । प्लक्ष बसरीमर । वट आलदमर । किंशुक बिळेमुत्तलमर । चंदन श्रीगंधमर ॥ १२ ॥ पिचुमंद बेविनमर । कोविदार कंचालदमर । सरल गुग्गुलमर । सुरदारु देवदारुमर । द्राक्ष द्राक्षबळ्ळी । इक्षु खब्बु । रंभा बाळेमर । जंबू नीर्लदमर । बदरी बोरीमर । अक्ष तारीमर । अभय अळ्ळीकायीमर ॥ १३ ॥ आमल नेल्लीमर । बिल्व बेलवंतनमर । कपित्थ ब्यळोलमर । जंबीर निंबीमर । भल्लातक केरमर । तस्मिन् वने ॥ १४ ॥ कुमुद बिळेनेदली । उत्पल करिकमल । कल्हार सौगंधिक । शतपत्र कमल । षट्पद भ्रमर । शकुंत शकुंतपक्षी ॥ १५ ॥ हंस हंसपक्षी । कारंडव कारंडवपक्षी । चक्राव्ह चक्रवाकपक्षी । सारस सारसपक्षी। दात्यूह करेकोळि ॥ १६ ॥ मत्स्य मीन । कच्छप कूर्म । कदंब सर्जवृक्ष । वेतस निरद्धबी । नल बाळदबेरु । नीप कडिविनमर । वंजुल कह्नीमुर्ष्टीमर ॥ १७ ॥ कुंद मुळ्ळह्वबी । कुरबक केंपुगोरोचन । अशोक बोरिनमर । शिरीष मुळ्ळमुत्तलमर । कुटज करीमल्लिगी । इंगुद इंगिनमर । नाग नागसंपिगेमर । पुन्नाग यली-

संपिगेमर । जाति जातिपुष्पदमर ॥ १८ ॥ मल्लिका मल्लिगेअंटु । शतपत्र तावरेबळ्ळी । माधवी इरवंतिगी । जालक मुकुलितमल्लिगी । नित्यं ऋतवः फलपुष्पादि संपत्तिहेतवो येषां ते तथा तैः ॥ १९ ॥ कंटक मुळ्ळुगळु कीचक पोळ्ळबिदरु । वेणु धट्टिबिदरु । वेत्र बेत्तगळु ॥ २० ॥ हरयः कपयो गजेंद्रा गजश्रेष्ठाः । व्याघ्र हुली । व्यालमृग सर्पाकारमृग । खड्ग तन्नामकमृगविशेषः । महोरग अजगरसर्पवु । सैरग सारंगमृग । कृष्ण यरळी । शरभ अष्टपादमृग । चमरी तन्नामकमृगविशेषः । वृक तोळ । वराह काडहंदी । महिष अडिविकोण । ऋक्ष करडी । शल्य अडिवीयत्तु । शालमरतका शिंगळीक । वृक पुरुषमुखतोळ । मर्कट कोढग । हरिण शृंगरहितयरळी । शश मोला ॥ २१–२८ ॥ अवसादनप्राप्तौ कष्टप्राप्तौ । मूले सकलं बलादिविपर्ययो विपरीतं । उद्देश्यविधेययोर्लिंगव्यत्ययो न दोषाय ॥ २९ ॥ टीकायां पारं गंतुमशक्त आत्मविमोक्षणे चिरं दध्यावित्यन्वयः ॥ ३० ॥ टीकायां ग्राहेणावृतो रुद्धोऽहं तं नमामि । उपद्रवं प्राप्तस्य मे विधातुर्दैवादातुरं मां मोक्षितुं मोचितुं गजाः करिणो करिण्यश्च प्रभवंति कुतः किं न प्रभवंतीत्यन्वयः ॥ ३१ ॥ मृत्युर्धावति पंचम इति श्रुत्यर्थस्तु । अग्निसूर्येंदुवायवश्चत्वारोऽयं मृत्युः पंचमो यद्भयाद्धरिभयाद्धावतीति काठके ॥ ३२ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां द्वितीयोऽध्यायः ॥ ८–२ ॥

॥ हरिः ॐ ॥ गजेंद्रः शरणं प्राप्तस्तं प्रकारमिति टीकापाठः । मूले जप्तुं योग्यो जप्य एव जाप्यस्तं । स्वार्थे आदिवृद्धिः । हृदि स्वरूपांतःकरणे । मनो बाह्यांतःकरणं समाधाय बाह्यव्यापारराहित्येन तदधीनं विधायेत्यर्थः ॥ १ ॥ हि शब्देनेत्यनेन मूले परेशाय धीमहीति पाठः स्फुट एव । धीमहि ध्यायेम ॥ २ ॥ मंत्रोक्तविशेषणविवरणपूर्वकमित्यस्यायं भावः । यस्मिन्यतो येनेत्यनेनादिबीजायेति विशेषणं विवृतमिति ॥ ३ ॥ जगज्जन्मादिकर्तृत्वमुक्तार्थं । क्वचिच्चतुर्मुखादावित्यादेरयं भावः मूलस्थक्वचित्पदार्थश्चतुर्मुखः क्व च पदार्थस्तदन्यः । चतुर्मुखस्य व्याप्तोपासकत्वात्सर्वं प्रतिभात्येव । तदन्यस्य बिंबोपासकत्वात्तादृशप्रतिभानं नास्त्येवेति । मूले पराद्ब्रह्माद्युत्तमश्रीतत्त्वान्नास्य सर्वनामसंज्ञा ॥ ४ ॥ पंचत्वादिकं च स्वतो नेत्याहेति टीकायोजना । मूले गहनं दुरवगाहं गंभीरमनंतं ॥५–६॥ सृष्ट्यादिकमेव व्रतं यस्य यत्तथेति टीकापाठः । न च ज्ञानक्रिययोर्द्वित्रिक्षणावस्थायित्वेन तिरोभावसंभवस्य सर्वसंमतत्वाद्ब्रह्मणः सृष्ट्यादि व्रतत्वं कथं युज्यत इति वाच्यं । चैतन्यशक्तिरूपेण गुणादेर्भाव इष्यते । सुप्तोयं बलवान्विद्वानित्यादि व्यवहारतद्वृत्त्येति गीतातात्पर्यप्रमाणानुसारेण ज्ञानक्रियादीनां शक्तिरूपस्वकारणात्मना बहुकालस्थायित्वांगीकारात् । तदुक्तं । व्यक्तिभावं गता या तु करोतीति स्वरूपिणी । शक्तिरूपा स्थिता सैव क्रियाशक्तिरितीर्यत इति । तत्तत्कार्यशक्तिजननरूपा स्थिता क्रियाऽत्र क्रियाशक्तिरुच्यत

इति तदर्थः । ततश्चेयं मूलयोजना । सर्वेष्वात्मस्वंतर्यामिणि हरौ भूताः स्थितिमंतः सुहृदोऽनिमित्तबंधवः सुष्टुसाधवः परकार्यसाधनशीला विमुक्तसंगा मुनयोऽव्रणमक्षतमलोकव्रतं लोकविलक्षणाचारं यस्य पदं स्वरूपं । उत्तमानां स्वरूपं तु पाद शब्देन भण्यत इत्युक्तेः । दिदृक्षवः संतो वने चरंति संचरंतीति । अकर्मकोऽयं धातुः । स हरिर्मे गतिरित्यन्वयः ॥ ७–८ ॥ तच्छब्दावच्छिन्नं तच्छब्दवाच्यं । अवच्छिन्न पदस्यानेकार्थत्वात् ॥ ९ ॥ न विद्यते रूपं पराधीन प्रकाशविशिष्टं च नमति ॥ नमः शांतायेति ॥१२॥ रूप्या इमे वासुदेवाद्यवतारा रूपीप्ययं नारायणः । एवं रूप्यरूपित्वेन निरूप्यमाणस्येति ॥ १३–१४ ॥ अखिलकारणत्वादि विशिष्टत्वेनोक्तः क इत्याशंक्येति ॥ १५ ॥ अन्यथा ज्ञानरक्षणकथनप्रसंगे हरेर्बलादि प्रदत्वप्रतिपादकश्रुत्याद्यनंगीकारे तद्रक्षणकथन ज्ञानरक्षणकथनं व्यर्थं स्यात् । प्राप्तस्यैव रक्षणीयत्वावगमात् ॥ १६–१७ ॥ मूले हरिरेकः प्रधानमिति अंतो निश्चयो येषामस्तीति एकांतिनः । अंतस्त्ववसिते मृत्याविस्यभिधानं ॥ १८ ॥ परात्परमित्येका । परमः पराध्यं इत्यपरा इति द्वे उपनिषदौ परेशपदेन गृह्येते । अतींद्रियमिति पदेन विमे कर्णा पतयत इति श्रुतिर्गृह्यते । एवं तत्तत्पदैस्तास्ता उपनिषदो गृह्यंते । श्रुतिद्वयमुक्तार्थं । विमे कर्णा इति श्रुत्यर्थस्तु । विमे इमौ कर्णा कर्णौ पतयतः विपतयतः । न पुनरुक्तिरिति टीकापाठः ॥ १९ ॥ मूले ब्रह्मादि देवानां वेदानां चराचरत्वाविशेषेऽप्यधिष्ठानविशेषात्पृथग्गृहणं ॥ २० ॥ अनेन शरीरस्यानित्यत्वेऽपि तत्सर्गस्य प्रवाहतो नित्यत्वकथनेन ॥२१॥ स्वतो बहुव्यक्त्यभावात्स्वतःप्रयोजनार्थमसुरान्विनैव देवमर्त्यतिर्यक्षु व्यक्त्यभावात् प्रादुर्भावाभावात् । तथा च लीलयैव देवादिषु हरेरवतारा इति भावः । नियतस्त्र्याद्याकाराभावादित्यस्यायं भावः । क्लीबरूपं तु हरेर्नैव । हरेः कदाचित्स्त्रीरूपं कचित्पुरुषरूपं भवेदिति । तथा श्रुतिराह । नैनं वाचा स्त्रियं ब्रुवन्नैनमस्त्री पुमान् ब्रुवं पुमांसं न ब्रुवन्नेव वदन्वदति कश्चनेति । श्रुत्यर्थस्तु । एनं स्त्रीरूपिणं विष्णुं वाचा वागिंद्रियेण स्त्रियमेवेति सावधारणं ब्रुवन्न वदति । एनं विष्णुं अस्त्री पुमान् क्लीबरूपं । द्वितीयायाः प्रथमादेशः । ब्रुवन्न-वदति । एनं विष्णुं पुमांसमेव सावधारणं ब्रुवन्न वदति । कश्चन ज्ञानी विष्णुः स्त्रीपुंरूपवानिति वदन् सम्यग्वदतीति ॥ २२ ॥ टीकायामिभयोन्या प्रकृत्येत्यनेन मूले इभस्य योनिर्यस्याः प्रकृतेर्हेतोः सा इभयोनिस्तयेति योगः सूच्यते । मूले अंतः लिंगशरीरे बहिः स्थूलशरीरे च । एतेनेभयोनेर्बहिःस्थत्वेन तदावरणत्वं स्यात् अंतरावरणत्वं कथमिति चोद्यं परास्तं । इभयोनिपदस्य विशेष्यानिघ्नत्वात् ॥ २३ ॥ तदनधिकारात् वेदांतज्ञानानधिकारात् । तत् लिंगशरीरनाशः स्यादित्यत एवं हेतोः । तं प्रमाणं मृद्घट इतिवत् । यथा वा मृदब्रवीदिति श्रुतेर्मृत् मृदभिमानिदेवताघटस्रष्टृत्वाद्घट शब्दवाच्या । तथा ब्रह्मविश्वस्रष्टृत्वाद्विश्ववाच्यमिति टीकायोजना । अजो विष्णौ

हरे छागे इत्यभिधानात् अज शब्देनोच्यते ॥ २४–२५ ॥ हेतोराश्रयासिद्धत्वेनानुमानानुदयादित्यस्यायं भावः । गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवदित्यत्र गगनारविंदमाश्रयः । स च नास्त्येव । तद्वत्प्रकृते ईश्वरीयाप्राकृतशक्तीनां बुद्धींद्रियाद्यगोचरत्वेनार्थात्प्राकृतशक्तयः पक्षत्वेनांगीकार्याः । ईश्वरस्याप्राकृतत्वेन प्राकृतशक्त्यभावात् त्वदभिमतपरिच्छिन्नत्वसाधनहेतोः प्राकृतशक्तिमत्त्वस्याश्रयासिद्ध्याऽऽदावनुमानानुदय एव । परिच्छिन्नत्वसाधनं च दूरोत्सारितमिति त्वदभिमतपक्षीभूतेशप्राकृतशक्तय एव न संतीति हृदयं ॥ २६ ॥ प्राग्जन्मनि गुरूपदेशानुसारेण गजेंद्रकृतायाः ॐ नमो भगवते तस्मा इत्यारभ्य नमो नमस्तुभ्यमित्यंत स्तुतेर्यज्जीवेश्वरास्वातंत्र्यस्वातंत्र्यज्ञानलक्षणफलं तत्फलं भगवान्वदेश आहेति योज्यं । टीकायां न वेद न जानातीति लटा अज्ञानस्य वर्तमानकालमात्रवृत्तित्वप्रतीतिनिरासार्थं पूर्वमिति शेष इत्युक्तं । अहं धियाऽहं मतिजनकया यच्छक्त्या ॥ २७ ॥ हरेः पूर्वमागमने हरेराज्ञामंतरेणागमने प्रयोजनासिद्धेर्ब्रह्मादीनां गजेंद्रोद्धारणलक्षणप्रयोजनासिद्धेरिति टीकार्थः ॥ २८–३१ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां तृतीयोऽध्यायः ॥ ८–३ ॥

॥ हरिः ॐ ॥ तन्नाशसाधनं दुरितनाशसाधनं ॥ १ ॥ मूले दिविस्वर्गे भवा दिव्या अप्सरसो ननृतुर्गंधर्वाजगुरिति विभागः । नर्तनस्य वनितैककार्यत्वात् । द्यौः स्त्री स्वर्गे च गगन इत्यमरः ॥ २–९ ॥ मूले पथा गजस्तब्धमतिस्तथैवाद्यायं राजा स एव गज एव । भवत्विति शेषः ॥ १० ॥ दिष्टं दैवप्राप्तं । तदुपधारयन् आलोचयन्निति मूलार्थः ॥ ११ ॥ मूले यस्य गजत्वेऽप्यनुस्मृतिः स कौंजरीं योनिमापन्न इत्यन्वयः ॥ १२–१५ ॥ मूले सर्वभूतमयः सर्वभूतप्रधानः ॥ १६–१७ ॥ भास्वरं तेजोमयं ॥ १८–२० ॥ पूर्वोक्तभास्वर पदेनात्रोक्तसूर्यपदस्य न गतार्थता । तत्र भास्वर पदस्य निन्नत्वात् ॥ २१–२२ ॥ दाक्षायणीं दक्षभार्यां प्रसूतिमित्यनेन दक्षस्येदं दाक्षं दक्षसंबंधिव्रतमयनमाश्रयं यस्याः सा दाक्षायणीति योगः सूच्यते । अन्यथा गोत्रत्वेन जातित्वात् ङीष् स्यात्तन्नात्र युक्तमिति हृदयं ॥ २३ ॥ सितवारणं ऐरावतं ॥ २४--२६ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां चतुर्थोऽध्यायः ॥ ८--४ ॥

॥ हरिः ॐ ॥ अर्जुनो गुणेन पूर्वकः प्रथमो येषां ते तथा ॥ १--४ ॥ कल्प्यं ज्ञानसामर्थ्योपेतं प्रति । इतः प्राप्तः । इण् गताविति धातुः । कर्तरिक्तः । अन्यथा शाश्वतत्वानुपपत्तिः ॥ ५–१५ ॥ दुर्वासशापेनेत्यार्षः ॥ १६--१८ ॥ वायु शब्देनात्र प्रवहो गृह्यते । अयथादेववैपरीत्येनासुरान् ॥ १९--२० ॥ अंशकलया अंशलेशेन ॥ २१--२५ ॥ वेदशिरोविशारदानां उपनिषत्कुशलानां । ॥ ३ ॥

कप्रथमपादपाठः । विषकंठोक्तिः पाशुपतशास्त्रं । आसमंतात् कणभक्षः कणादः तदुक्तिर्न्यायशास्त्रं । संकरोक्तिरद्वैतशास्त्रमिति विवेकः । लोकतत्रं लोकसिद्धांतं विचार्यापीति योज्यं । प्रमितेन प्रमाविषयेन गृहीतेन । अनेन श्लोकेन ॥ ४३ ॥ निर्वृतस्पष्टशक्तय इति च टीकायां गृहीतप्रमाणपाठो मे भाति । स्वाराज्यलाभः स्वयं प्रकाशमानानंद इत्यनेन लाभ पदस्यानंदे जहल्लक्षणा सूच्यते । अन्यथा प्रकाशार्थकस्वाराज्यपदेन लाभपदस्य गतार्थतास्यादिति । वर्तमानायापीति चतुर्थ्यंतो टीकापाठः ॥ ४४--४६ ॥ तन्मत-दूषणात् कर्मप्राधान्यवादिमतदूषणात् ॥ ४७–४८ ॥ तत्तृप्त्यभावेन इंद्रादि देवतातृप्त्यभावेन । अपुरुषार्थः पुरुषार्थाभावः । तरो-र्मूलाच्छाखावधिः स्कंधः । स्कंधात्प्रथमोत्पन्ना या सा शाखेत्युच्यते । यथा हत्येकं वाक्यमित्यस्यायं भावः । वाक्यस्य पदसमूहरूपत्वा-त्तथा हीति पदद्वयं संमेल्यैकं वाक्यमिति । अत एकपदमिति नोक्तं । मूले यथा हि यथैव । एवं तथेति योज्यं ॥ ४९ ॥ पूर्वोक्तसु-खांबुजमिति । यौगपद्यप्रतीतिं एककालावच्छेदेन स्थित्यादि प्रवृत्तिप्रतीतिं ॥ ५० ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां पंचमोऽध्यायः ॥ ८–५ ॥

॥ हरिः ॐ ॥ यथा तत्त्वं तत्त्वमनतिक्रम्य स्तुतिरपि । मूले सहस्रार्काणां द्युतिरिव द्युतिर्यस्य स तथा । इदमपि बुध्यारोहार्थ-मुक्तमिति हृदयं ॥ १--५ ॥ कांचीं एव कलापो भूषणं ॥ ६--७ ॥ शर्वस्य करणेनेति टीकापाठः । करणत्वेनाप्रधानत्वेनेति । सह-योगेऽप्रधानमित्यनुशासनात् । तथा चास्य ततो हरेः सकाशादवरत्वप्रतीतेः । गुणत्वोक्तिर्गुणाभिन्नत्वोक्तिः ॥ ८ ॥ भूवीति पाठे आधार इत्यर्थ इत्यस्यायं भावः । भुव्यमुष्मिन्पश्यामि त्वं नः शरणमित्येवान्वय इति ॥ ९ ॥ आद्यं त्रिषु प्राथमिकं जन्म आदि-कारणं यस्य त्रिकस्य स आद्यादिः । तद्गुणसंविज्ञानबहुव्रीहिः । द्वितीयादि शब्देनांतर्मध्ये गृह्येते । अयमर्थस्तदधीनसत्ताकत्वरूपोऽर्थः । अशेषविशेष नामेति मूलपाठः॥१०॥ स्यादित्याशंक्य न स्यादिति सिद्धांत इत्याशयेनाह ॥ त्वामिति ॥ विकल्पपरतया टीकापाठो मे भाति ॥११॥ अंबु यथेति दृष्टांतांतरकथनं । तथा शब्दः समुच्चयइत्यस्यायं भावः । तथा शब्देनात्रैव दार्ष्टांतिकोपपादनं नेति ॥ १२--१४ ॥ द्विजाश्च देवाश्च द्विजदेवास्तेषां मित्रं द्विजदेवमित्रः । विश्वामित्र इतिवत् । तस्य संबुद्धिर्द्विजदेवमित्र ॥ १५ ॥ मूलेऽधिकारी भक्ति-पारवश्यात्पुनः पुनर्भगवन्महात्म्यं वदेदिति भावेन पुनरुक्तं करोति ॥ एक एवेति ॥ १७–१८ ॥ व आत्मनो युष्मदात्मनश्चेतनस्ये-त्यर्थः ॥ १९ ॥ फलकोर्ध्वद्वारा पिधानाग्रद्वारा । आयामतो खर्वा ह्रस्वाया मंजूषा तस्यां । किंवदंती जनश्रुतिः । वै शब्देन योग्यतां सूचयतीत्यस्यायं भावः । देवत्वयोग्या ये मनुजास्तेऽप्यमृतभागिन इति ॥ तदुक्तं ॥ नवकोट्यो हि देवानां तेषां मध्ये शतस्य

तु । सोमाधिकारो वेदोक्तो ब्रह्मणी द्वेशताधिक इति । वीरुत्पदेन विस्तीर्णलता ग्राह्या । लता शब्देन लतासामान्यग्रहणं ॥ २२--२३ ॥ सांत्वयोक्तया यथेति टीकापाठः । सांत्व पदं विशेष्यनिघ्नमिति भावेनोक्तयेत्युक्तं । अत्यर्थमधुरं सांत्वमित्यमरः ॥ २४--३६ ॥ मूले जीवितयोरुभयोर्मध्ये निर्जरान्देवान् निर्व्रणान् अक्षतान् यथावच्चक्र इत्यन्वयः ॥ ३७--३९ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां षष्ठोऽध्यायः ॥ ८--६ ॥

॥ हरिः ॐ ॥ हलवत्सीरवद्धलति विदारयति यथार्थज्ञानामिति हालाहलमन्यथाज्ञानामिति भावेन टीकायामुक्तेन हालाहलं नामेत्यादिनाऽध्यायारम्भे सावरस्य राज्ञः किमनेन विषाद्यभिव्यक्तिकथनेनेति चोद्यं परास्तं । तथा च विषमद्यामृतव्यक्तिनिदर्शनेनान्यथाज्ञानाज्ञानयथार्थज्ञानैस्त्रिविधजीवानां तमः संसारमोक्षा भवंतीत्येतज्ज्ञायत इति हृदयं । पुंसि क्लीबे च काकोलः कालकूटो हालाहल इत्यमरः ॥ १ ॥ हरिर्विष्णुर्यतः परस्तान्मुखभागे सर्पमग्रहीत्ततस्तस्मादेव देवाः पूर्वं मुखभागेऽभवन्निति मूलं योज्यं ॥ २ ॥ मूले चेष्टितं चेष्टां । भावे क्तः ॥ ३ ॥ अर्थवादेनामंगलत्वमुपपादयंतीति टीकापाठः । वादे स्वमाहात्म्यवादे सति ॥ ४--७ ॥ विघ्नेशेन वरिष्टविघ्नेन ॥८॥ मूले लक्षयोजनप्रस्तारो विस्तारोऽस्यास्तीति तथा तेन ॥९--१०॥ मूले न विद्यते बोधो ज्ञानं यस्मात्तदबोधं तमः । अस्य प्रवर्तके लक्षणांगीकार्येति भावेन तमोगुणप्रवर्तकमित्युक्तं । न विद्यते बोधो यस्य स तिर्यग्जातेः स तथा । तस्य रूपमिव रूपं यस्य तथेति वा योगः कार्य इति भावेन तिर्यग्रूप इति वेत्युक्तं ॥ ११--१२ ॥ आरमन्यंत इति टीकापाठः । अंतर्देवदैत्यमध्य इत्यर्थः ॥ १३--१९ ॥ मूले मुनीनामभियुतं तपः ॥ २०--२५ ॥ हविर्भागदातेति आत्मपदफलितोऽर्थः । मूलेऽखिलदेवतानां हविर्भक्षयतीति अखिलदेवतात्मा । अद भक्षण इति धातुर्णिजंतोऽयं ॥ २६--२८ ॥ उपनिषत् उपनिषदः । समुदायविवक्षयैकवचनं ॥ २९--३० ॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं । उर्ध्वरेतं विरूपाक्षं शंकरंनीललोहितमिति तापनीयाभिधाथर्वणीयत्वाक्ये रुद्रेऽपि ब्रह्म शब्दश्रवणादत्रापि ब्रह्मशब्दो रुद्रपर इत्यत आह ॥ यत्तव परं ज्योतिः रूपमित्यादिना । तथा च तापनीयवाक्यस्य पूर्वार्धे विष्णवाख्यं परं ब्रह्मोक्तमिति योज्यं । उत्तरार्धे विरूपाक्षाख्यमपरं ब्रह्मोक्तमिति योज्यं । पूर्वोत्तरार्धयोर्भिन्नविषयत्वेऽन्वयस्तु । परं ब्रह्म प्रति ऊर्ध्वरेतमिति । अमुख्यया वृत्त्या जीवेऽपि ब्रह्म शब्दसद्भावाद्विरूपाक्षमित्यादि नपुंसकलिंगं । पूर्वोत्तरार्धयोरेकविषयत्वांगीकारे कृष्णपिंगलपदेन नीललोहित पदस्य गतार्थता स्यादित्यतो प्रतीतमप्येकविषयत्वं परित्यज्य भिन्नविषयत्वग्रहणं यथा न्याय्यं तथाऽत्रापि रुद्रे परंज्योतिस्त्वरजस्तमःसत्त्वासंसर्गित्वानुपपत्त्या तत्तच्छब्दानां भिन्नविषयत्वमिति भावः ।

विरिंचस्यायं वैरिंचो रुद्रः । संबंधार्थेऽण् ॥ ३१ ॥ मूले कामो मन्मथोऽध्वरो दक्षयज्ञस्त्रिपुरस्तन्नामासुरस्त्रीणि पुराणि वा कालो यमो हरो रुद्र इत्यादीन्यनेकानि यानि भूतानि तद्द्रुहः । अत्ता चराचरग्रहणादिति सूत्रात् । कामादि गणे हरेति रुद्रवाचकपदस्वीकारात्सर्वसंहारकर्तृत्वं हरेरेव न हरस्येति हृदयं ॥ ३२--३३ ॥ अन्यत्र सनकादय इत्यनेन मूले ब्रह्मादय इत्यत्र द्वितीयपक्षे अतद्गुणसंविज्ञानबहुव्रीहिः सूच्यते । वयं ब्रह्मपुत्रा इत्यस्यायं भावः । सनकादीनां विरिंचमनोजातत्वेनामलत्वं तथा नास्माकं । अर्धनारीनरस्वरूपब्रह्मपुत्रत्वादिति ॥ ३४--३८ ॥ मूले प्राणिनामिति कर्मणि षष्ठी । भूतेषु परस्परं जिघांसत्सु सत्सु ॥ ३९ ॥ मूले स्वस्तिरित्यप्यव्ययम् ॥ ४०--४१ ॥ मूले करतलीकृत्य पाणितल परिमाणोपेतमात्रं कृत्वा । अत्र वायुं चोचे प्रशांतय इति तात्पर्येण वायुदत्तमेव किंचिद्विषं हरेण पीतामिति ज्ञेयं ॥ ४३--४४ ॥ मूलेऽर्जुनादि व्यावृत्त्यर्थं प्रायश इत्युक्तं ॥ ४५ ॥ दाक्षायणी पूर्वजन्मनि दक्षकन्या पार्वती ॥ ४६--४७ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां सप्तमोऽध्यायः ॥ ८--७ ॥

॥ हरिः ॐ ॥ भगवतो रुद्रस्य महिमानं हरन्निति मूलं योज्यं ॥१-५॥ मूले स्वर्गिणां रमण्यो रतिप्रदाः ॥ ६ ॥ टीकायां विद्युदिति पदस्य विशेषणत्वं स्पष्टमुक्तं ॥ यद्वा ॥ सुदामा तन्नामपर्वतस्तास्मिन् जाता सौदामिनी विशिष्टवाचकयोरेकस्य विशेषणपरत्वन्यायोऽत्रानुसंधेयः ॥ ७ ॥ मूले तत्तत्सात्त्विकादि स्वभावभेदेन स्पृहाभेदो ज्ञेयः । अन्यथा देवदारादि कामानां संगिसंगस्ततोऽधिकः । किंतु विष्णोरिति वक्ष्यमाणतात्पर्यविरोधः स्यात् । ततश्चायं मूलार्थः । सुरास्तस्यां भगवत्प्रीतिसाधनरमाप्रीत्यां स्पृहां चक्रूः । तमोगा असुरास्तस्यां रमायामेव स्पृहां चक्रुः । मानवास्तु तस्यां रमाप्रसादसाध्यसंपदि स्पृहां चक्रुः । सुरविषयेअक्षिप्तचेतस इति पदच्छेदः । असुरविषये आक्षिप्तचेतस इति पदच्छेदः । मानवविषये हिरण्यवर्णां हरिणीमित्यादि श्रुत्युक्तरूपादि श्रवणेन क्षिप्तचेतस इति पदच्छेदः ॥८-१७॥ विलोकयंति नान्वविंदन्नित्येद्धरेः सर्वोत्तमत्वज्ञापकमेव न तु मार्गेणेन रमाया अज्ञानमिति मूले चार्थः । समना चास्त्वत्युपक्रमादमृतत्वं चानुपोष्येति सूत्रात् ॥१८॥ तदेवाह ॥ नूनमिति । वि अप इत्युपसर्गद्वयं ॥१९॥ तच्च त्यजनं चार्थिभ्य इत्यारभ्य विलक्षणत्यागाधिकारित्वादित्यंतं वाक्यं च सामान्यनिषेधपरं । द्वितीयपक्षे वायुरपीत्यारभ्य वचनाद्वेत्यंतं वाक्यं वायुमुद्दिश्यैवोक्तं । उत्तरत्रानेन वायुर्लक्ष्यत इत्युक्तत्वात् । मूले वायुपरत्वेन योजनाप्रकारस्तु । क्वचिद्वायौ त्यागो मोक्षयोग्येभ्यो मोक्षदानमस्ति । तच्च वायोर्मोक्षदानरूपं कर्म स्वातंत्र्येण मुक्तिकारणं नेत्यन्वयः । विष्णुर्हि मोक्षदाता च वायुश्च तदनुज्ञयेत्युक्तेः ॥२०॥ सोऽपि मुक्तोऽपि त्रैकालिकसुमंगलो न भवतीति शेषेणान्वयः ॥२१॥ अब्जश्चंद्रः । अब्जो जैवातृकश्चंद्र इत्यमरः ॥ २२--२४ ॥ काहलो गोमुखे तुर्ये दुंदुभौ च प्रचक्षत इत्यनेन मूले एकेन तुर्यपदेन

एतानि सर्वाणि वाद्यानि ग्राह्याणीति सूच्यते ॥ २५--२९ ॥ आश्चर्यलक्षणं माहात्म्यं ॥ ३०--३२ ॥ मूले अंशांशसंभवः विष्ण्वंश पद्मनाभांशसंभव इत्यर्थः ॥ ३३ ॥ हृञ् हरण इति धातुः । हरणं त्वपहार एव । आहारस्तु तत्पर्याय एवेति भावेन टिकायामा हृतमाहार इत्युक्तं । भावे क्तः ॥ ३४--४५ ॥ मूले धर्मादनिच् केवलादिति सूत्रेण दस्यु धर्माण इति रूपं । दस्योश्चोरस्य धर्मो येषां ते दस्युधर्माणः ॥ ४६ ॥ मूले धाम द्युतिः ॥ ४७--५० ॥ शं विधानं मनःसंतोषकरणमिति टीकापाठः ॥ ५१ ॥ मूले भेदो विग्रहः ॥ ५२--५४ ॥ नूत्नं नूत्नमित्येकं पदं । वीप्सायां द्विर्भावः ॥ ५५--५८ ॥ भूतेषु प्राणिषु स्थितं विं परमात्मानं प्रीणंतीति विप्रभूतास्तेभ्यो विद्वोगा दत्वा ॥ यद्वा ॥ विप्रत्वेन संपद्यमानेभ्य विप्रभूतेभ्य इति च प्रत्ययः । शुनिचैव श्वपाकेषु पंडिताः समदर्शिन इत्युक्तेः । गो विप्रभूतेभ्य इति परपाठः ॥ ५९ ॥ अपहूतानि नवानि । अहतं यंत्रनिर्मुक्तमुक्तवासः स्वयंभुवेति स्मृतः ॥ ६०--६४ ॥ सुधा पयसि देवान्ने इत्याभिधान कथनेन मूले सर्पविषये सुधा पदं क्षीरवाचीति सूच्यते ॥ ६४--६६ ॥ स्त्रिया सह विवादस्य जुगुप्सया ॥ ६७--६९ ॥ अल्पावितोऽसंस्पृष्ट इत्यर्थः ॥ ७० ॥ ग्रहं सूर्यादिवद्ग्रहाधिकारिणं । यः स्वर्भानुस्तस्य शिर इति योज्यं ॥७१--७२॥ विकल्पयोग्याः फलवैचित्र्ययोग्याः ॥ ७३--७४ ॥ तदर्चनाभावे देवाद्यर्चनाभावे । आत्मा परमात्मा महनीयः पूजनीय इति वचनात् । हरौ क्रियमाणो य आदरस्तदभावाद्दैत्यानां फलाभाव इत्यतो वाऽऽहेति योज्यं ॥ ७४ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यामष्टमोऽध्यायः ॥ ८-८ ॥

॥ हरिः ॐ ॥ देवासुरसंबंधार्थेऽणू ॥ १--८ ॥ द्विजैः पक्षिभिः ॥ ९-१२ ॥ पिच्छविराचितचामरैरित्यनेन बर्हचामरैरिति मूलपाठः सूच्यते । मध्यमपदलोपकर्मधारयसमासः । पुच्छबर्हे नपुंसक इत्यमरः । बार्हचामरैरिति परपाठः ॥ १३ ॥ उत्तरीयैरुष्णीयैश्च ॥ १४ ॥ ध्वजिन्यौ ध्वजस्तंभसमेतसेने । वरूथिन्याविति टीकापाठः । मूले वीचिमालाभिस्तरंगवृंदैः । स्त्रियां वीचिरथोर्मिष्विव्त्यमरः ॥ १५ ॥ वैरोचन इति संबंधार्थेऽणू । मुले विहायसस्याकाशस्येदं वैहायसं । व्योममार्गेण गच्छदित्यर्थः । विहायसोऽपि नाकोऽपीत्यमरः ॥ १६--१७ ॥ मूले उदये उदयाचले ॥ १८--२३ ॥ मूले बलभित् इंद्रः ॥ २४--२७ ॥ मूले गुहः षण्मुखः ॥ २८--३० ॥ निशुंभशुंभयोर्निशुंभशुंभाभ्यां ॥ ३१ ॥ मूले वृषाकपिर्नामा कश्चिद्देवोऽत्र विवक्षितः ॥ ३२--३५ ॥ यथर्क्षेतिवत् गदार्ष्टिरिति संधिः ॥ ३६ ॥ आरोहंतीत्यारोहाः सादिनस्तैः सहिता वाहाः । ज्यया मोर्व्या आसमासनं यत्तद्धनुरिति टीकापाठः । मूले आसमंतादस्यतेऽनेनेति आसं धनुरिति वा । असू निरसन इति धातुः ॥ ३७ ॥ मूलेऽसृक्स्रुतिभिः रक्तक्षरणैः ।

सृञ् सरण इति धातुः ॥ ३८ ॥ ३९ ॥ पतितैश्च स्वशिरोक्षिभिरिति मूलपाठः । इदं दोर्दंडविशेषणं ॥ ४० ॥ वाहान् ऐरावतपादरक्षकान् आरोहं गजयंतारं ॥ ४१--५५ ॥ कर्मण्यण् प्रत्ययः कर्मण्युपपदे धातोरण् प्रत्ययः स्यादित्यर्थः । अनेन कालनेमेरसुरवरिष्ठत्वमुक्तं भवति । सिंहस्य ऐरावतगजारित्वादेवारिः सिंहो वाहो यस्येत्युक्तं । अत एवेभारिवाह इत्यस्यार्थः स्पष्ट एव ॥ ५६ ॥ आहत्य संघट्य ॥ ५७ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां नवमोऽध्यायः ॥ ८--९ ॥

॥ हरिः ॐ ॥ इत्यत इति हेतोः । तं बलिं । उक्तदृष्टांतविवरणेनैव निंदतीति योज्यं । पूर्वोक्तः कश्चिदज्ञोनटः ॥ १--४॥ यत्र नारीत्यत्र यथोपमालुप्ता तथाऽत्रापीति । अत्रापि विधुनोतीत्यत्रापि ॥ ५--७ ॥ अकारवाच्ये वासुदेवे या पंडा बुद्धिस्तमिताः प्राप्ता अपाडिताः । इण् गताविति धातुः ॥८--१० ॥ तथ्यवादिनेत्यापि पदच्छेदः ॥ ११--१५ ॥ दशशतैरश्वैर्युतः ॥ १६--२४ ॥ विभक्तिविपरिणामोऽत्रेति भावेन भिन्ननवो भिन्ननाव इति व्याख्यातं ॥२५॥ मूले अग्रणीः सारथिः ॥ २६--३३ ॥ यतो नमुचेः सकाशाद्वज्रः प्रतिहतस्तस्मान्नमुचेरिंद्रो बिभेदिति वक्तुः शुकस्य विशेषवाक्यं विधौ लिङ् परस्मै पदं ॥ ३४--३५ ॥ मुले सारमयं श्रेष्ठष्वपि प्रधानं । रसः सारो वरः श्रेष्ठ इत्यमरः । त्वाष्टं तपस्त्वष्टस्तपोरूपो वृत्रः ॥ ३६ ॥ मूले ब्रह्मतेजो दधीचेस्तेजः ॥ ३७--४० ॥ न शुष्केण वा इवाम्रिशुष्यत्स्वजनकं समुद्रजलान्येन । नकुलनखशब्दवदिमौ शब्दौ । स चार्द्रेणार्दीकृतः सोदरो यश्चंद्रमास्तदन्येन फेनेनेत्यर्थः । चंद्रमाः समाख्यातस्तरवश्चोदाहृत इति निघुंटुः ॥ यद्वा ॥ शुष्केन नमुचेः शिरो न जहारार्द्रेण च नमुचेः शिरो न जहार । किंतु परिशिष्टफेनेन जहारेति शेषेणान्वयः। शुष्केणार्द्रेण च फेनेन नमुचेः शिरो न जहारेति न जहारैवेति वेत्युभयात्मकः ॥४१-४५॥ मूले संगीयमानानुचरैरिति पाठः ।संगीयमानअनुचरैरिति छेदः।संगयिमानेति प्रातिपदिकमर्थवदधातुरप्रत्ययश्चेति भावेन टीकायां अनुचरैः संगीयमाना इत्यर्थ उक्तः । गीयमाना अनुचैररिति परपाठः ॥ ४६--४९ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थेविचारिण्यां दशमोऽध्यायः ॥ ८--१०॥

॥ हरिः ॐ ॥ मूले तत्र तत् रूपं द्रष्टुं ॥ १--२ ॥ सोषामविंदत्ससत्वासोऽग्निं सोऽर्केण विबबाधेत मामित्यादिश्रुतौ सोषामित्यत्र सः उषामिति छेदो यथा तथा मूले सोमयेत्यत्र सः उमयेति पदच्छेद इति भावेन टीकायां स उमया सोमयेत्युक्तं । अनेन श्रौतप्रयोगेण सोमयेति संधिः कथमिति चोद्यं परास्तं । सोमया उमया सहेति परव्याख्यानं चापहसितं । ततश्चायं मुलार्थः । उमया पार्वत्या । करणेन । षण्मुखादिरस्माद्भवतीति भावः । उमापतिः सदाशिव इति ॥ ३--५ ॥ शबलं सगुणं ब्रह्म । मुले विगता गुणाः सत्त्वा-

दयो यस्मात्स तथाविधगुणस्तं । विश्वस्यात्मेश्वरश्चेत्यत्रैव मूले पुनरुक्तिशंका न कार्येति हृदयं । प्रकृत्यात्मनात्वकृतामित्यस्यायं भावः स्वर्णस्वरूपस्य पृथक् रचना कुंडलाद्याभरणकरणसमयेति । सामर्थ्यभावेन सामर्थ्यसत्वेन । अवस्तुभूतोऽपारमार्थिकः । स एवोपाधिरेव नास्ति । पूर्वमानंदमात्रमित्युक्तपदे उपाध्यभावस्य निर्धारितत्वात् ॥ ७–९ ॥ जन्मास्थित्यादीनां विरुद्धधर्मत्वाद्भिन्नकर्तृत्वेनेत्यर्थः । हरेर्नानात्वं । नन्वासुरकल्पनाऽऽसुरसंबंधिनी हरेर्नानात्वकल्पना भ्रांतिरस्तु । एकविषया चैतन्यैक्यविषयकल्पना । ततो नानात्वकल्पनाया अन्या व्यतिरिक्ता सती दैवी भवतु चेत्तर्हि तव स्तुतिः किं प्रयोजनेति शंकायां तत्राहेति योज्यं । सर्वस्य चेतनजातस्येत्यर्थः ॥ १० ॥ मूले येन मया सोऽहमिति योजना ॥ ११ ॥ हरेर्योषिद्रूपस्येतरस्त्रीवैलक्षण्यं द्योतयितुं पुनरुक्तं करोतीत्याह ॥ येनेति ॥ १२–१४ ॥ कृद्योगे कर्त्रर्थयोगे । अनेन मूले कामिनां च कामिभिरकामिभिश्च मंतव्यामित्यन्वयः सूच्यते । गंतव्या ते वसतिरलकेति टीकापाठः ॥ १५–२० ॥ इति एवं भूतया लीलया ॥ २१ ॥ मुले ससूत्रं कांचीसाहितं ॥ २२–२५ ॥ मूले करेणुमिव करिणीमिव । करेणुरिभ्यां स्त्रीनिभे इत्यमरः ॥ इभ्यां हस्तिन्यां करेणुः स्त्रीलिंगा इभे हस्तिनि ना पुल्लिंगः ॥ २६–२९ ॥ वैरिणा पुरुषार्थविरोधिनेत्यनेन मूले मोक्षविषयक वैरो । विरोधो यस्मादस्ति स वैरी । तेन वैरिणेति योगः सूच्यते । वैरिणा विरुद्धप्रेरणावता वेत्यनेन विरुद्धं तत् इरं च ईरणं वीरं वीरमेव वैरं । तदस्यास्तीति वैरी तेन वैरिणेति योगः सूच्यते । विगत ईरो वायुर्येषां ते वीरा वायुद्वेषिणस्तेषामिदं वैरं प्रेरणमस्यास्तीति वैरीति वा । एतेन कामाः कदाचिद्रुद्रांतः प्रविष्टकलिशत्रुरेव न रुद्रशत्रुरिति सूच्यते । उभयोर्मुक्तियोग्यत्वाविशेषात् । द्वैति नेतिवदयं प्रयोगः । तथा च कामस्य स्वभावतः सर्वशत्रुत्वेऽपि विशेषतो रुद्रशत्रुत्वाद्वैरिणेति दृष्टांतमनुपपन्नामिति पक्षद्वयेन वैरि पदार्थवक्तृणां हृदयं । मुले पदवीं प्रत्यपद्यत इवेति इव शब्दस्य क्रियायामन्वयः । वस्तुतो न प्रत्यपद्यतेत्यर्थः । यतो वाचो निवर्तंतेऽप्राप्य मनसा सहेति श्रुतेः ॥ ३०–३४ ॥ तदुदाहृतं तां ग्राम्योक्तिमिति टीकापाठः । मूले तच्च तत् उदाहृतं च तदुदाहृतं । भावेक्तः । अथवा । अवगतमाहात्म्य इति मूलपाठः ॥ ३५–४० ॥ मूले आत्मांशभूतां परमात्मस्वरूपांशभूतां । मायां योषित्तनुं ॥ ४१ ॥ मुले अपि इंद्रादि देवतोत्तमे हे भवानि । कलानां स्वदंतजीवानामेव ऋषभः ॥ ४२–४६ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यामेकादशोऽध्यायः ॥ ८–११ ॥

॥ हरिः ॐ ॥ मूले षण्णवतिश्राद्धांतर्भूतचतुर्दशमन्वादि श्राद्धानां मध्ये एकस्य मन्वादि श्राद्धस्याभिमानि देवतात्वाच्छ्राद्धदेवनामा । अस्य वर्तमानकालीनमनुत्वात्तथा प्रसिद्धिः न त्वितरेषां ॥ १–१० ॥ विगतो रजो रेणुर्येभ्यस्ते विरजाः । शिरोवाची शिरो

दंतो रजोवाची रजस्तथेति । अत्रोदाहरणं । अर्थाः पादरजोपमा इति । बलेरष्टमे मन्वंतरे यदिंद्रपदप्राप्तिस्तदनंतरं तत्पदप्राप्त्यनंतरम् का सिद्धिः कस्मादाप्तासिद्धिरिति शंकायां तत्राहेति टीकायोजना । ततः सिद्धिमवाप्स्यसीति स्वोक्तेः। अनेन बलेः कर्मजदेवत्वमेव न तात्त्विकदेवत्वमिति ज्ञायते । सप्तममन्वंतरे पदत्रयं याचमानाय । इंद्रपदमष्टममन्वंतरे हित्वा यो बलिस्ततः सिद्धिमवाप्स्यतीति च टीका योजनीया । एवं मूलं च योज्यं । अन्यथा बलेरेककालावच्छेदेन भूदानकरणे इंद्रपदानुभवतत्परित्यागपूर्वकासिद्ध्यनुपपत्तिः प्रसज्येत बलिरिंद्रो भविष्यतीति स्वोक्तविरोधश्च स्यात् ॥ १३–१६ ॥ मूले देवगुह्यां देवगुह्याभिध ब्राह्मणस्येयं देवगुही तस्यां । अपरीतवत्संज्ञायां नित्यं ङीप् । सरस्वत्यां तन्नाम्न्यां नाम्ना सार्वभौमपतिरित्यष्टमे मन्वंतरे जातः । देवगुह्यात्सरस्वत्यामित्यपि पाठः । पूर्वमष्टममनुऋषिदेवादि कथनावसरे भगवदवतारस्यानुक्तत्वादत्रैवोक्त इति हृदयं ॥ १७–३२ ॥ मूले दिवस्पतेरिंद्रस्योपहर्ता संपादकः ॥३३–३६॥ युगसाहस्रपर्यया महायुगसहस्रेण पर्ययः परिवर्तो यस्य स तथा ॥३७॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां द्वादशोऽध्यायः ॥ ८–१२ ॥

हरिः ॐ ॥ नयंत्यभिप्रचोदितादिति मूलपाठः । नयंत्येभिः प्रचोदिता इति परपाठः ॥ ३-१० ॥ अवांतरमन्वंतराण्याहुरित्यस्यायं भावः । साधिकैकसप्ततिमहायुगेष्वर्तमनुपुत्राद्युपभुक्तानि कानिचिद्युगानि मन्वंतरानुषंगान्येव ग्राह्याणीति ॥ ११ ॥ इति श्रीभागवतव्याख्यानंविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां त्रयोदशोऽध्यायः ॥ ८-१२ ॥

॥ हरिः ॐ ॥ मूले पितामहः प्रल्हादः ॥ १-९ ॥ मूले परिधीन् दिशः ॥ १०-२० ॥ मूले जितग्रहां निर्जित सूर्यादि ग्रहां ॥ २१-२९ ॥ विप्राणां भृगूणां सकाशादुत्तरोत्तरफलं ॥ ३०-३६ ॥ इति श्रीभागवतव्याख्यानविचयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां चतुर्दशोऽध्यायः ॥ ८-१४ ॥

॥ हरिः ॐ ॥ मूले नष्टेषु अदृष्टेषु ॥१-३॥ नागतमपि किमित्यनेन सर्वत्रापि शब्दः प्रश्नार्थक इति सूच्यते ॥४॥ हे गृहमेधिनि ॥ ५-९ ॥ अस्वस्थं अप्रकृतिस्थं ॥ १० ॥ हे गृहमेधिन् ॥ ११-१३ ॥ याः प्रजास्तास्विति मूलं योज्यं ॥ १४ ॥ तव यो व्यवहारस्तदर्थं वांऽश पदार्थः ॥ १५-१८ ॥ आत्मनात्मनोर्बह्व्भ्यंतरामिति क्व शब्दार्थः ॥ १९-२५ ॥ मूले सिनीवाल्यां फाल्गुणशुद्धप्रातिपादि । सा दृष्टेंदुः सिनीवालीत्यमरः ॥ २६-२८ ॥ अत्र तत्त्वानां मुख्यत्वाद्गुण शब्दवाच्यत्वं ॥ २९-३० ॥ मूले द्विशीर्षे इति भावेन टीकायां तदनूद्य चत्वारिशृंगेति श्रुतेरित्युक्तं । श्रुत्यर्थस्तु । वक्ष्यमाणमानेनैव स्पष्टः ॥ ३१-३५ ॥ अतस्ते

तपसेति मूलपाठः ॥ ३६ ॥ श्रिया शोभया ॥ ३७-४२ ॥ तद्द्रवमानं तीर्थमित्यर्थः । तत् शेषं ॥ ४३-६२ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां पंचदशोऽध्यायः ॥-८-१५ ॥

॥ हरिः ॐ ॥ अच्युतेत्यनेनेत्यस्यायं भावः । यथाऽच्युत शब्दो विष्ण्वेतरासंभावितगुणांतरवाचकस्तथा तीर्थपदेत्यादि शब्दा अपि विष्ण्वेतरासंभावितगुणांतरवाचका इति । श्रवणे कर्णौ ॥ १८ ॥ विश्वायेत्यत्र न सर्वनामसंज्ञा ॥ ९-१५ ॥ तत्र तेषु देवेषु ॥१६॥ मूले कुत्सार्थकः क प्रत्ययः इदानी मादित्याकृतं विष्ण्वर्चनं स्वार्थ स्वप्रयोजनार्थमिति शोधयाति निःसंशयं करोतीत्यर्थः ॥ १७-१९ ॥ मूले सुसंवृतात् सुसंगुप्तादित्यर्थः । देवगुह्यात् देवरहस्यात् ॥ २०-२१ ॥ उपाधावादिति मूलपाठः ॥ २२-२६ ॥ अंभःपतितमित्येकं पदं । नृणादिकमित्यर्थः ॥ २७-२८ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां षोडशोऽध्यायः ॥ ८-१६ ॥

॥ हरिः ॐ ॥ वलयांगदैरुल्लसंति किरीटादीनि यस्य स तथा ॥ २-३ ॥ द्यौः स्वर्गः । अग्निजिव्हा देवाः । नगाः पर्वताः ॥ ४ ॥ सिंह्मसौरमासस्य श्रावणत्वाद्वामनावतारकाले सिंहराशौ सूर्यावस्थानाच्च सौरमासविवक्षया टीकायां श्रोणायां श्रावणमासीत्युक्तं । पौर्णिमांत चांद्रमानगणितभाद्रपदमासविवक्षया टीकायां श्रवणद्वादश्यामित्युक्तं । अनेन श्रावणे मासि शुक्लद्वादश्यां कदाऽपि श्रवणर्क्षयोगासंभवात् । टीकायां श्रावणे मासि श्रवणद्वादश्यामिति कथनमयुक्तमिति चोद्यं परास्तं । ततश्चायं मूलार्थः । श्रोणायां सिंहस्थसूर्ये सति श्रोणायां श्रवणनक्षत्रे चंद्रे सति श्रवणद्वादश्यां भाद्रपदशुद्धद्वादश्यामभिजितिमुहूर्ते विजयसंज्ञके मध्यंदिने प्रभुर्वामनोऽवततार । नक्षत्राण्यश्विन्यादयस्ताराः कौंडिण्यादयस्तत एवाद्या येषां सूर्यादि ग्रहाणां ते तथा । तज्जन्म वामनावतारं दक्षिणमुदारं चक्रुरिति लोकानुकरणार्थमियमुक्तिः । वामनावतारकाले बहवो गुणा बभूवुरिति हृदयं ॥ ५-११ ॥ तदभिप्रायेण भेदाभिप्रायेण ॥ १२-१६ ॥ सस्यविशेषव्यावृत्त्यर्थं अंकुरविशेषव्यावृत्त्यर्थं । अतसी स्यादुमाक्षुमेत्यमरः ॥ १७ ॥ ब्रह्महस्तिभ्यां वर्चस इत्यनुशासनेन ब्रह्मवर्चसमिति रूपं ॥ १८-२३ ॥ उपवीतवद्धुतं । अजनमेवोत्तरमुत्तरीयं यस्य स तथा ॥ २४-२५ ॥ रूपस्याकृतेरनुरूपा अवयवा यस्य स तथा । तं दृष्ट्वेति शेषः २६-२७ ॥ अप्यर्थे च शब्दः ॥ २८ ॥ हे आर्य ॥ २९--३२ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां सप्तदशोऽध्यायः ॥ ८--१७ ॥

॥ हरिः ॐ ॥ इति शब्देनोत्कर्षार्थकेति शब्देन । इति स्वरूपसांनिध्ये विवक्षानियमेऽपि च । हेतौ प्रकारप्रत्यक्षेऽपकर्षेष्वव-

धारणे । एवमर्थे समासौ स्यादिति हैमः । मूले इति उत्कर्षसूचकं बलेर्वाक्यमिति योज्यं ॥ १ ॥ सांपराये पारलौकिके धर्मे । युद्धायत्योः सांपराय इत्यमरः । आयतिरुत्तरकालः ॥ २ ॥ इत्यत इति हेतोः ॥ ३ ॥ यथा योग्यमित्यनेन केषांचित्पराङ्मुखत्वं केषांचिदमनस्वित्वं चेति सूच्यते ॥ ४ ॥ मूले यतो यस्मिन्युष्मत्कुले ॥ ५ ॥ कृतः कृतिनः शिक्षितधियः । श्रयस्याश्रयति ॥६--७॥ मूले मया सर्वसाधनेषु प्रधाना संवित् । मयैव माया सा येषामस्तीति मायाविन इति योगः कार्य इति भावेन मायाविनां ज्ञानिनामित्युक्तं । माया शब्दात् मतुबर्थे विनि प्रत्यये मायावीति रूपं ॥ ८ ॥ परांचि बाह्यानि खानि इंद्रियाणि देही विशेषेणावृणोदिति श्रुत्यर्थः ॥ ९ ॥ विविग्नचेता विशेषेण भग्नचेता इव स्थित इत्यर्थः ॥ १० ॥ वैकुंठं शून्यं नारदादिभ्यो परिमृश्येति वेति टीकायोजना । अन्यथा हिरण्यकशिपोः सनकादिदत्तशापस्याप्रयोजकता स्यात ॥ ११--१३ ॥ प्रल्हादसदृशः पुत्रो यस्य स तथेति टीकार्थः । अनेन मूले प्रल्हाद इव पुत्रो यस्य स तथेति विग्रहः सूच्यते ॥ यद्वा ॥ प्रल्हादपुत्रो हिरण्यक इवेति लुप्तोपमा । ते पिता तत् विद्वान् कपटज्ञो निजवत्सल आत्मीयासुरवशोऽपि द्विजलिंगत्वाद्धेतोर्देवेभ्यः स्वमायुरदादिति मूलयोजनेत्याशयेन टीकायां प्रल्हादः पुत्रो यस्य स तथेत्युक्तं । तत्कुले पुत्रो योग्यश्चेत्पौत्रस्त्वयोग्य एवेति हृदयं ॥ १४ ॥ यत् याच्नायां यजमानस्तवनं तन्ममाभीष्टमिति टीकायोजना । मूले आचरतीति लुडात्मनेपदमित्याशयेनाचरितानुष्ठितेति व्याख्यातं । आचरिता आचरितारौ आचरितार इति धातुरूपं । सविता सवितारौ सवितार इति प्रसवार्थकधातुवत् । आचरितानिति परपाठः ॥ १७ ॥ बुद्धेर्वैशद्ये विशदत्वे ॥ १८ ॥ बुद्धिमानिवेति व्यतिरेको वेत्यनेन मूले बुद्धिमान्पदलयं यथा न वृणोति तथाऽयं वृणीते इति योज्यं ॥ १९ ॥ अपहसस्यपहासं करोषि ॥ २०--२५ ॥ ज्योतिषि प्रभायामर्चिषि ज्वालायामित्याभिधानार्थः ॥ २६--२७ ॥ मूले जलभाजनमुदकपूर्णपात्रं । पात्रमत्रं च भाजनमित्यमरः ॥ २८ ॥ इति शिक्षयन् लोकशिक्षां कुर्वन्नाहेत्यनेन मूलं शुक्रस्य विदां वरत्वं चेत्तर्हि पात्रतमाय भूदाननिषेधकरणमसंगतं । निषेधे विदां वरत्वमसंगतमिति चोद्यं परास्तं । वामनस्य पात्रत्वमस्तु । अपात्रे दाननिषेधोऽवश्यं कार्य एवेति हृदयं ॥ २९--३० ॥ मूले सुखं नयतीति नयो नीतिस्तद्विरुद्धोऽनय इति नञो विरुद्धार्थत्वेन धर्मविरुद्धोऽधर्म इति वद्योगः कार्य इति भावेनानयोर्दुःखहेतुर्नीतिरिति व्याख्यातं ॥ ३१--३३ ॥ मूले दिवं स्वर्गं ॥ ३४--३८ ॥ सर्वस्वादानलक्षणं यावद्द्रव्यदानाभावलक्षणं ॥ ३९ ॥ विपक्षे सर्वदाने । उत्खातशिफ उत्खातजटः । तस्मादनृतं न वदेति चेति प्रमाणवाक्यं । केषुचित्पुस्तकेष्वेतत्प्रमाणशेषो विशेषतोऽप्यस्ति ॥ ४० ॥ अर्थस्यार्थवादस्य वाचकं ॐ इत्यक्षरं वदेदित्यर्थ इति टीकायोजना ॥ ४१ ॥ आत्मवृक्षस्य देहाख्यवृक्षस्यानृतं मूलं ।

अनृताभावे आत्मवृक्षो नश्यतीति यद्बाधकमुक्तं तद्बाधकं प्रमाणांतरेण दृढयति । कामेभ्यः काम्यंत इति कामा इंद्रियविषयास्तेभ्यो विषयाणां यावद्द्रव्याणां दत्तत्वान्नालं । किंच यत्किंचनापि द्रव्यं नेति । अदानेऽल्पस्यापि द्रव्यस्य दानाभावेऽदृष्टविरोधेनादृष्टं यत्स्वर्गादि फलं तद्विरोधेन ॥ ४२ ॥ नर्मणि परिहास इत्यर्थः । वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेदिति स्मृत्यनुसंधानेन हिंसायां त्रैवर्णिकविषयायामित्युक्तं ॥ ४३ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यामष्टादशोऽध्यायः ॥ ८--१८ ॥

॥ हरिः ॐ ॥ सत्यसंधनिश्चयं सत्यसंकल्पविषयकनिश्चयं ॥ १–८ ॥ तीर्थं मंत्रेऽप्युपाध्याय इत्यादि यादवः ॥ ९–१६ ॥ अपामद्भिरिति षष्ठी तृतीयार्थे इत्याशयेनापां भृतं पूर्णमित्युक्तं । जलैरवनेजयंती प्रक्षाल्यमिच्छंतीति टीकापाठः । तदानीमपामवनेजनीयत्वसंभवात् । मूलेऽवनेजन्यपां भृतमिति पाठः टीकाकृतां हृद्य इति भाति । अवनेजंतीत्यत्रावनेजितुं प्रक्षालितुमिच्छंतीति णिजिर शौचपोषणयोरिति धातोः शतृचू प्रत्ययांते स्त्रियां ङीप् नुमागमश्च । अवनेजन्यपां भृतामिति परपाठः ॥ १७ ॥ मूले आङ्पूर्वात् पातेः आप इति रूपं । स्त्रीरूपत्वात्स्त्रीलिंगं बहुरूपत्वाद्बहुवचनं ॥ १८--२४ ॥ मूले ऋषिषुभवं ऋष्यं ज्ञानं । वंश्यमितिवत् ऋष्यमिति रूपं । सत्यं यथार्थवचनं ॥ २५ ॥ मूले द्यौः द्यां ॥ २६–२७ ॥ रेतस इदं रेतस्यं ऊषस्यमितिवत् रूपं भवतीति भावेन रेतस्यमिति मूलमनूद्य रेतस उद्भूतमिति फलितोऽर्थ उक्तः । मूले जातयो जातीः ॥ २८--३१ ॥ सुनंदेन युक्तो नंदो येषु ते नंदेननंदाः स्वपार्षदमुख्याः कुमुदकुमुदेक्षणादय ईशमुपतस्थुरिति मूलं योज्यं ॥ ३२ ॥ मूले मधुव्रतानां भ्रमराणां स्रजः पंक्तयो यस्यां तया वनमालया वृतः । त्रिविष्टपं स्वर्गः । द्वितीय पादांत एवाभूदित्यन्वयः अंघ्रिर्द्वितीयः । पाद एव दिवः स्वर्गस्योपरि महरादिभ्यः परं सत्यलोकं गत इति मूलं योज्यं ॥ ३३ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यामेकोनविंशोऽध्यायः ॥ ८–१९ ॥

॥ हरिः ॐ ॥ मूले अंगानि शिक्षादीनि ॥ २ ॥ मूले अः अकरवाच्यो हरिः कल्पकः कर्ता यस्य धाम्नस्तत्तथाऽकर्मकमिति पाठः टीकायां स्पष्टार्थ एव । परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति श्रुतेः ॥ ३ ॥ मूले पादावनेजनेन पादप्रक्षालनेन प्राप्ता या पवित्रता तया ॥ ४--८ ॥ त्रिपदविषयाया व्याजयाच्ना कपटयाच्ना तया बलेर्मही हृतां दृष्ट्वाऽमर्षिताः संत ऊचुः ॥ १० ॥ मूले माया कापट्यमेषामस्तीति मायाविनस्तेषां ॥ ११- १२ ॥ अनुचरासुरा इत्येकं पदं ॥१३-१७॥ मूले ऋषेरिदं ऋष्यं ॥१८॥ मा युद्ध्यतेत्यत्र माङ्योगान्नाडागमः । धातुरूपं तु अयुध्यः अयुध्यतं अयुध्यत लृङात्मनेपद मध्यमपुरुषः ॥१९-२०॥ मूले तस्य भवस्य विपरीतं यथा भवति तथा ॥२१--२५॥ मूले विषु पक्षिषु राजत इति विराट् गरुडः ॥२६॥मुले रोदस्योर्द्यावापृथिव्योः॥२७-२८ ॥ मूले मही सर्वा द्यौश्चेति द्वाभ्यामिति योज्यं ॥२९॥ पादत्रयं मितं परिमितं ॥३०॥ सप्तपादचतुर्हस्त इत्यादि लक्षणशास्त्रे लक्षितं सप्तपादत्वं च पादगणनया सप्तपदपरिमितदैर्घ्यमित्यादि लक्षणवत्तयोक्तं यत्पदं तस्याणुत्वेन भूमेस्तु तन्मितत्वेन लक्षणशास्त्रोक्तपादपरिमितत्वेन यथा प्रतिश्रुतं तथा दत्ते दाने किमनुपपन्नं का वाऽनुपपत्तिरित्याशंक्य पूर्णमदः पूर्णमिति श्रुतेरिदं प्रतीयमानपदं लोकविलक्षणमित्याशयेन प्रतिश्रुतदानस्यापूर्तिमाहेति टीकार्थः । न च लक्षणशास्त्रोक्तपदस्याणुत्वशंकाया नेदमुत्तरमिति वाच्यं । स्वपादगणनया सप्तपादपरिमितदैर्घ्यत्वस्यैवोक्तत्वादिति । मूले त्वमात्मनेति पाठः । आत्मना व्याप्तेन मयेति योज्यं ॥ ३१–३२ ॥ स्वर्गमाप्नुवानीति मनोरथो मृषाभवतीति टीकापाठः ॥ ३३ ॥ विप्रलंभनदोषात् वंचनदोषात् ॥ ३४ ॥ अलीकमनृतं ॥ ३५ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां विंशोऽध्यायः ॥ ८–२० ॥

॥ हरिः ॐ ॥ प्रलंभनं वचनं । विप्रलंभनं कथं न भवेदिति तत्राहेति टीकापाठः । हरेः पादद्वयेन यावद्विश्वस्य क्रांतत्वेन बलेः शीर्षस्यापि विश्वांतःपातित्वेनाक्रांतत्वात्कुरुशीर्षणीति वचनमनुपपन्नं । किंच बलेः शिरश्च विश्वं क्रांतवतो हरेस्तृतीयपादपर्याप्तमिति यत्तदप्यनुपपन्नमिति वाच्यं । आत्मानं विनैव द्रव्यदानस्य प्रतिश्रुतत्वेन दातुराधिकत्वेनावशिष्टत्वात्तादानींतनकालस्थितजनापेक्षयेति । शतेषु जायते शूरः सहस्रेषु च पंडितः । वक्ता दशसहस्रेषु दाता भवति वा नवेति कस्यचिदुक्तेः ॥ २ ॥ अभिन्नात्मत्वमभिन्नमनस्कत्वं ॥ ४ ॥ बलेस्तवनेनेति टीकापाठः । आज्ञाय प्रल्हादागमनामिति हेतोः प्रल्हादस्य भक्त्यातिशयं दर्शयितुं तद्बालिभक्तिविशेषज्ञानपर्वकं प्रल्हादागमनमाह शुक इति अवतरणं योज्यं ॥ १२ क्रीडार्थमिति चापर इति माण्डूकश्रुतेः ॥ अधिपतौ समर्थः प्रभुरिति पदद्वयमस्तीति प्रमाणार्थः ॥ १९ ॥ अविक्लवया धिया आत्मा च निवेदित इति मूलं योज्यं ॥ २२ ॥ स्वाभिप्रायं भगवान्वक्तीति टीकायोजना ॥ २४ ॥ एतल्लक्षणदर्शनाय भक्तलक्षणदर्शनाय । अतिशयेन दविष्टो दवीयान्सुदूरो मार्गो न गंतव्यः। दवीयश्च दविष्टं च सुदूरं चेत्यमरः ॥ २८ ॥ आशयोद्रेकवान् बलिः ॥ ३२ ॥ तदवस्थ एव दुर्वार एव ॥ ३६ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थचारिण्यामेकविंशोऽध्यायः ॥ ८--२१ ॥

॥ हरिः ॐ ॥ अन्यत्रानपसदद्दुष्प्राप इति टीकापाठः । अनपसदैरुत्तमैरपि दुष्प्राप इति तदर्थः । अलब्धपूर्वं इति यथायोग्यं ज्ञातव्यमित्यनेन मूले योग्यतामतिक्रम्यालब्धपूर्व इति योज्यमिति सूच्यते ॥ २--४ ॥ पूर्वमेवलब्धो लब्धपूर्वः स चासौ प्रसादश्च

॥ ५ ॥ प्रागेव रमादीनामेतस्मादप्यधिकप्रसादपात्रत्वादिदानीं नेति निषेध इति हृदयं ॥ ६ ॥ मूले दाक्षिण्यदृष्टिपदवीं बहुमानपूर्व-कचित्तानुवर्तनं दाक्षिण्यं तेन या दृष्टिस्तद्विषयतां प्रापितः ॥ ७ ॥ आक्षेपफलं विष्णुधिक्कारफलं ॥ ८--१३ ॥ अंतरायेण विघ्नेनोपहति-र्यस्य तदंतरायोपहतिः । मूले सुष्ठुवैषम्यं यस्य तत्सुवैषम्यं ॥ १४ -२१ ॥ कल्पं पालने समर्थे ॥ २२--२८ ॥ संसार एव व्याघ्रास्तेषां संघातः समूहस्तस्य विघातो विनाशस्तद्विषये दक्षत्वं । वचनाल्लडर्थे लिडिति टीकापाठः ॥ २९ ॥ अन्यविषयकर्मसमयेऽपि देवादिवि-षयकर्मसमयेऽपि । जगत्कर्म देवादिलक्षणजगद्विषयकं कर्म । फलप्रदं यथास्यात्तथा करोतीत्याहेति योज्यं ॥ ३१ ॥ इति श्रीभागवतव्या-ख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां द्वाविंशोऽध्यायः ॥ ८--२२ ॥

॥ हरिः ॐ ॥ मायामत्स्यस्य हरेर्विडंबनमनुकरणं यस्यां सा तथेति । समासांते ङीष् ॥ १--७ ॥ अंतिकेऽहरदिति टीका-पाठः ॥ ८ ॥ मूले शफरीरूपं मत्स्यरूपं ॥ ९ ॥ तत्र राजर्षिः कश्चिदित्यत्र तृतीयस्कंधोक्तहिरण्याक्षकथायामाचार्योक्तं व्यत्यासेनापि चोच्यत इति तात्पर्यमनुसंधेयमिति । अन्यथा दैनंदिनप्रलये सत्यव्रतस्थित्यभावेन पूर्वोत्तरश्लोकानुपपत्तिः प्रसज्येत ॥ १०--१५ ॥ कल-शाप्सु कलशस्थितापेषु । अत्र समासांतविधेरनित्यत्वं ॥ १६--१८ ॥ व्यामत्रयं । व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगंतरमित्यमरः ॥ १९--२१ ॥ अविदासिनि अनुपक्षये ॥ २२ ॥ मूले संमितमसंमितमिति वा पदच्छेद इति भावेन टीकायां वेत्युक्तं ॥२३--२४॥ मूले वल्गु यथा भवति तथा भारतीं वाणीं वदता तेन मत्स्येनेति योज्यं ॥ २५ ॥ अन्हायेत्यव्ययमिति भावेन झटितीति व्याख्यातं ॥ २६--२९ ॥ तदप्यसत्कृतभगवत्पादोपसर्पणलक्षणकर्मापि मध्ये विच्छिन्नमिति शेषेण योज्यं । अनेनं विदिति श्रुतेरत्रमानं । आश्चर्यं वपुः। वपुः डुवप् बीज संतान इति धातोरिति टीकापाठः। रूपं अदीदृशः दर्शितवानितीति टीकापाठः । अदीदृशः अदीदृशतं अदीदृशत । क्रियाया अनिष्पत्तौ हेतुहेतुमद्भावे लृङ् मध्यमपुरुषः ॥ ३०--३१ ॥ संवर्तोर्मसि प्रलयोदके ॥ ३२--३५ ॥ महोऽहिना वासुकिना ॥ ३६--४२ ॥ विनाशिविरोधि क्षेममित्येकोऽर्थः । जीवानां शं सुखमविनाभावं सुखयुक्तं पदं विधास्यतीति टीकापाठः । तदर्थस्तु । जीवानां शं सुखमविनाभावं स्वरूपभूतं सुखयुक्तं तादृशसुखाश्रयं पदं विधास्यतीति वेति । अनेन मूलेऽविना जीवस्वरूपभूतं शं सुखं यस्मिन्पदे तदविनाशमिति योगः सूच्यते ॥ ४३--४६ ॥ अनादिरविद्योपहता यया साऽनाद्यविद्योपहता ॥ ४७--५० ॥ अंधंतमः ॥ १० ॥ प्रविशंतीतीशावास्यश्रुतेः । ज्ञानस्यासत्यत्वे उपपादितज्ञानस्यासत्वे भवन्मते द्वैतभंग इति शंकायां तत्राहेति टीकायोजना । तथाचाद्वैत-ज्ञानस्यासत्वं नामामंगलत्वं नात्यंताभावप्रतियोगित्वमिति समाधानं वाक्यस्य हृदयं ॥ ५१--५४ ॥ पुराणसंहितां मत्स्यपुराणं । इत्यत

इत्येत्रोक्तमवशेषत इत्यनेनेत्यर्थः ॥ ५५–६० ॥ संकलय्य संकोच्य । अनंतशक्तिरिति तात्पर्येण सा शफरी अतिकरुणं यथा स्यात्तथा तं सत्यव्रतमाहेत्यादि पूर्वोक्तक्रीडेति हरेर्लीलेति ज्ञातव्यमिति टीकार्थः ॥ ६१ ॥ इति श्रीभागवतव्याख्यानविजयध्वजाख्यस्य टिप्पण्यां गूढार्थविचारिण्यां त्रयोविंशोऽध्यायः ॥ ८–२३ ॥ दृष्ट्वैतद्देशगद्वित्रपुस्तकानि यथामति । टीकापाठो मूलपाठस्त्वयमेवेति च ब्रुवे ॥१॥-तथाऽपि कुत्रचिद्बुद्धिदृष्ट्योर्व्यत्यासमेव मे ॥ क्षाम्यंत्वजानतः प्राज्ञा बालस्य पितराविव ॥२॥ इतिश्रीमत्पूज्यपादकंठपल्लीस्थलवसत्याचार्यवर्यहृत्सरोजनिवासश्रीमदानंदतीर्थस्वांतकुमुदहंसायितवासिष्टकृष्णात्मकश्रीकृष्णार्पणमस्तु ॥ इति गूढार्थविचारिण्यां टिप्पण्यामष्टम स्कंधः समाप्तः ॥ ८ ॥

॥ अष्टमः स्कंधः समाप्तः ॥

पुटे	पंक्तौ	अशुद्धम्	शुद्धम्	पुटे	पंक्तौ	अशुद्धम्	शुद्धम्
७	२०	मुले	मूले	८	२४	विष्ण्वेतर	विष्ण्वितर
,,	२८	मुले	मूले	,,	२७	नृणादि	तृणादि
,,	२९	स्त्रीनिभे	स्त्रीनेभे	,,	३७	उपवीतवत्धुतं	उपवीतवत्धृतं
,,	३४	मुले	मूले	९	१४	पात्रमत्रं	पात्रामत्रं
८	३७	,,	,,	,,	३२	नंदेननंदाः	....
,,	८	पर्यया	पर्ययो	१०	६	स्त्वमा	मया
,,	११	गेष्वंर्तमनु	गेष्वंतर्मनु	१०	२३	एव व्याघ्रा	एवाघा
,,	१८	फालगुण	फाल्गुण	,,	३६	विनाशि	विनाश
,,	२३	विष्ण्वेतर	विष्ण्वितर				

शुद्धाशुद्धपत्रिका—श्रीमद्भागवतटिप्पणी विजयध्वजगूढार्थविचारिणी.

पुटे	पंक्तौ	अशुद्धम्	शुद्धम्
१	७	श्रतः	श्रुतः
,,	११	अक्रूत्या	आकूत्या
,,	१७	श्रत्यर्थस्तु	श्रुत्यर्थस्तु
,,	२३	तदा।विना	तदाविना
,,	,,	चक्षुष्ट्व	चक्षुष्ट्वं
,,	२४	श्रत्यर्थस्तु	श्रुत्यर्थस्तु
,,	,,	,,	,,
,,	२६	ये । न	येन
,,	२७	परंज्योति	परंज्योतिः
,,	,,	श्रत्यर्थस्तु	श्रुत्यर्थस्तु
२	४	बाहुलयो	बाहुल्ययो
,,	६	त्रिभिश्शृंगैरितिः	त्रिभिः श्रृंगैरिति
,,	७	द्रुमलता	द्रुमलता
,,	८	सिंह्यानां	सिंहानां
,,	३१	जप्य एव	जप्यो जप्य एव
,,	३७	यत्तथेति	स तथेति
३	२३	साधनहेतोः	साधकहेतोः
४	२६	भगवान्वदेश	भगवान्वेदेश
४	४	नभः	नञः
४	२७	हरिर्धिषणाया	हरेर्धिषणाया
,,	२८	प्रातिशतीति	प्रविशतीति
५	२	लोकतत्रं	लोकतंत्रं
,,	५	तत्तप्त्यभावेन	तत्तृप्त्यभावेन
,,	१२	भूवीति	भुवीति
,,	१९	खर्वा ह्रस्वाया	खर्वात्धृस्वाया
,,	२०	नवकोय्यो	नवकोट्यो
,,	२६	सावरस्य	सावसरस्य
६	१२	चक्रूः	चक्रुः
,,	२६	विह्वोगा	गा
७	९	मुले	मूले
,,	१०	त्वाष्टं	त्वाष्ट्रं
,,	,,	स्त्वष्ट	स्त्वष्टु
,,	१६	गूढार्थे	गूढार्थं
,,	१९	मुलार्थः	मूलार्थः



॥ इति श्रीमद्भागवतटिप्पणी विजयध्वजगूढार्थविचारिणी समाप्ता ॥